# श्रीमद्भगवद्गीता - पञ्चमोऽध्यायः

## कर्म सन्न्यास योगः

**अर्जुन उवाच**
सन्न्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥1॥

**श्री भगवानुवाच**
सन्न्यासः कर्मयोगश्च निश्श्रेयस करावुभौ ।
तयोस्तु कर्मसन्न्यासात् कर्मयोगो विशिष्यते ॥2॥

ज्ञेयः स नित्य सन्न्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥3॥

साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्या स्थितः सम्यक् उभयो र्विन्दते फलम् ॥4॥

यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥5॥

सन्न्यासस्तु महाबाहो दुःखमाप्तु मयोगतः ।
योगयुक्तो मुनिर्ब्रह्म नचिरेणाधि गच्छति ॥6॥

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्म भूतात्मा कुर्वन्नपि न लिप्यते ॥7॥

नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् ॥8॥

प्रलपन् विसृजन् गृह्णन् उन्मिष न्निमिष न्नपि ।
इन्द्रिया णीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥9॥

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्र मिवाम्भसा ॥10॥

कायेन मनसा बुद्ध्या केवलै रिन्द्रियै रपि ।
योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्म शुद्धये ॥11॥

युक्तः कर्मफलं त्यक्त्वा शान्ति माप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥12॥

सर्वकर्माणि मनसा सन्न्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥13॥

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफल संयोगं स्वभावस्तु प्रवर्तते ॥14॥

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञाने नावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥15॥

ज्ञानेन तु तदज्ञानं येषां नाशित मात्मनः ।
तेषा मादित्य वज्ज्ञानं प्रकाशयति तत्परम् ॥16॥

तद्बुद्धयस् तदात्मानः तन्निष्ठास् तत्परायणाः ।
गच्छन्त्य पुनरावृत्तिं ज्ञान निर्धूत कल्मषाः ॥17॥

विद्या विनय सम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥18॥

इहैव तैर्जितः सर्गः येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्मात् ब्रह्मणि ते स्थिताः ॥19॥

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धि रसम्मूढः ब्रह्मवित् ब्रह्मणि स्थितः ॥20॥

बाह्य स्पर्शेष्व सक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोग युक्तात्मा सुख मक्षय मश्नुते ॥21॥

ये हि संस्पर्शजा भोगाः दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥22॥

शक्नोतीहैव यः सोढुं प्राक्शरीर विमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥23॥

योऽन्तःसुखोऽन्तरारामः तथान्त र्ज्योति रेव यः ।
स योगी ब्रह्म निर्वाणं ब्रह्मभूतोऽधि गच्छति ॥24॥

लभन्ते ब्रह्म निर्वाणम् ऋषयः क्षीण कल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥25॥

कामक्रोध वियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्म निर्वाणं वर्तते विदितात्मनाम् ॥26॥

स्पर्शान्कृत्वा बहि र्बाह्यान् चक्षुश्चैवान्तरे भ्रुवोः
प्राणापानौ समौ कृत्वा नासाभ्यन्तर चारिणौ ॥27॥

यतेन्द्रिय मनोबुद्धिः मुनिर्मोक्ष परायणः ।
विगतेच्छाभय क्रोधः यः सदा मुक्त एव सः ॥28॥

भोक्तारं यज्ञ तपसां सर्वलोक महेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्ति मृच्छति ॥29॥

॥ ॐ तत्सदिति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुन संवादे कर्म सन्न्यास योगो नाम पञ्चमोऽध्यायः ॥

STOTRADHWANI

LEARN CORRECTLY, CHANT CONFIDENTLY